तस्मांबु निष्कास सुप्रयास खिन्नांगमूर्त्तेर्दयया स्त्रयोभूत् ॥४८॥ निवासस्थानं आस्पदभूतः सर्वार्थिरग्नः तस्मात्कूपात् ॥
नीरं जलमुद्धसबहिरानीय स्नातः कृताप्लवः सन्वर्त्तमानः निबोदोक्तमंत्रैः सहस्रशीर्षा पुरुषइत्यादिपुरुष
सूक्तोक्तमंत्रैः विधिवद्यथाविधिमुदापरमहर्षेण विप्रो गौडकी पुत्रस्त्रागलग्रामस्थः अभिषेकं धारयाजलसे

चनम् चक्रे विदधे ॥४७॥ यावदितितेनवर्णिराजेन मुहुः पुनः पुनः यावद्दृसरिमितम् पयोजलम् अभिषिक्तम्
क्षितम् तावत्तसरिमितम् पयः सविघ्नुः पयोतत्तो यावत्सिक्त तलपानानंतरम् अंबुनोजलस्यनिष्कासः कर्म
डलुनाबहिरुद्धरणंतस्यपयः स्रुप्रयासः असंतश्रमस्तेन खिन्नानिधर्मविंदवंतिअंगान्यवपमायसास्तथा
भूतामूर्त्तिः स्वरूपंयस्यतस्यतथोक्तस्यतस्यवर्णिराजस्यभक्तिं पेमवीक्ष्यदयपाद्रूपयाअत्रपः नविद्यतेदुषापि
पासायस्यसतथोक्तः अभूत्वभूव ॥४८॥ तृषेति ततस्तत्र्यानिवृत्तसनंतरम् यवर्णीनैष्ठिकः सनीलकंठः

तृषानिवृत्तिंसमुपेयुषेस्मै वितर्कयामासततः स्वचित्ते ॥ जिघित्सितायेतिभृत्यांसवर्णी किमर्पयाम्यत्रफलादि
हीने ॥४९॥ विचिंतयस्तेनमुपेयिवांसो तस्मिंस्तपोदिव्यमहोभिरामे शिवावदातामभवायतस्मैसक्तूनदृष्टहृदमर्
धरप्रियाय ॥५०॥
ज्ञापिपासातस्यानिवृत्तिः त्रांतिस्ताम् उपेयुषेप्राप्नवते भृत्यंमसंतंजिघत्सितायजिघत्सालु
बुंक्षासंजाताः स्येतितस्मैतथोक्ताय अस्मैज्ञालग्रामायफलादिहीनेफलपुष्पादिवर्जितेअत्रास्मिन्नरण्येपक्
मूल्यर्पयामिदद्यामितत्समुनाप्रकारेणस्वचित्तेनिजमनसिवितर्कयामासयद्वसैतावतीविपासात्वगितानांहि
बुभुक्षापिभूयसीस्यादेवेतिविचारंकृतवान् ॥४९॥ विचिंतयतीतितपसित्राशिमहन्नाहेतुचांद्रायणादिरनकर 

णेसत्यविदिव्यमहसाअलौकिकतेजसाअभिरामेअतिरमणीये तस्मिन्वर्णींद्रेएवमुक्तप्रकारेणविचिंतयति
विचारंकुर्वतिसतिउपेयिवांसोप्राप्तवंतोनृपौशिवापार्वतीचशिवोमहेश्वरश्चतौतथोक्तौपुमान्स्त्रियेत्येकशे
षः दृढदृष्टयोयावज्जीवब्रह्मचर्यंतस्यधाराधारकाजनाः प्रियाःप्रेमास्पदभूतायस्यसतस्मैतथोक्ताय अभवायस्वा
श्रितसकलजनसंसृतिदुःखदूरायानिवर्त्तकाय यत्प्रसादभवतिकर्मश्रृंखलाबद्धजीवस्वतंत्रजायतेकिंतुसकलज
नोद्धारणायानवधिकातिशयदययैवप्रादुर्भवतीसभवः स्वतंत्रजन्मेसर्थः तस्मैतथोक्तायतस्मैवर्णिराजा

आदत्तदिव्याचरितःप्रकामंश्रीविष्णुदेवेप्रापसमर्पितांस्तान् ॥ वृत्तंस्ततोभूतपुरींप्रयातोरामानुजार्च्चामवलो
क्यहर्षम् ॥५१॥ कुमारिकाक्षेत्रमथाययौततः सपद्मनाभंचततनार्हनंस्तुभम् ॥ कि [illegible]
निनायदेसान्द्रुतमादिकेशवंपराभवंतत्रहरिर्मृगानिव ॥५२॥
यसलवणानितितिरोषःसक्तून् अदातामार्पयता
म् ॥५३॥ आददितिदिव्यमप्राकृतमाचरितंतपश्चर्यादिक्रियानुष्ठानंयस्यसतथोक्तः सवर्णिराजः श्रीविष्णुदेवेशालि
ग्रामायसमर्पितानिवेदितान् तान्सलवणसक्तून्प्रकामंभृत्याम् आदत्तभक्षितवान् ततःकूपप्रदेशात् व्रजन्
गच्छन्भूतपुरीमुप्रयातः प्राप्तः सन्तत्रस्थितामितिशेषः रामानुजार्च्चां रामानुजप्रतिमाम् अवलोक्यदृष्ट्वाहर्षंपर

हरिसं· ॥१५॥ मानंदम् प्राप प्रपेदे ॥ ५१ ॥ कुमारिकाक्षेत्रमिति ॥ अथ भूतपुरीं प्राप्य नंतरम् स वर्णिराजः कुमारिकायाः क॰ सर्ग· १०
न्याभिधाया दुर्गायाः क्षेत्रं स्थानम् आययौ प्राप्तः ततः कुमारिकाक्षेत्रात् पद्मनाभं तदाख्य विष्णुप्रतिमास्था
नम् आययौ प्राप्तः ततः कुमारिकाक्षेत्रात् पद्मनाभं तदाख्य विष्णुप्रतिमास्थानम् आययौ शुभमुत्तमम्
जनार्दनं च पद्मनाभक्षेत्रात् जनार्दनाख्य विष्णुप्रतिमाक्षेत्रमाययौ ततः आदिकेशवं तदाख्य विष्णुप्रतिमा
क्षेत्रमाययौ तत्र तस्मिन्नादिकेशवाख्य विष्णुक्षेत्रे निवसतः स्वं त्रिघां स्नतिति विशेषः दैसानस्करान् वर्णिराजः

संपेदे मलयाद्रिमैक्षत हरिस्तं साक्षिगोपालकं किष्किंधा नगरीं चकार सवनं पंपासरः पावनम् ॥ गत्वा विठ्ठल
नाथमाधिनृपमना सौ पुंडलीकं पुरं नत्वा तं परिरभ्य मंजुलतरं गोदावरीं संगतः ॥ ५२ ॥ हरिः सिंहः मृगान् हरिण
निवहं तं शीघ्रम् पराभवमपमानं क्षप्यपि समर्थः निनाय प्रापितवान् यथा पूर्वं प्रानसपत्नेन सत्त्वधर्मेण राज्ञा दुर
रेणैव तत्क्षेत्राधीशेन नृपतिना द्वारेणास दुस्तनोऽस्करा निहता इति भावः ॥ ५३ ॥ संपेद इति ततः आदिकेशवक्षेत्रा
त् आधिं स्वमूर्तिदर्शनदानेन जनमनो व्यथां नामयति निरासयतीति तथोक्तः असौ वर्णिराजो हरिः मलया
द्रिम् मलयाख्यं कुलगिरिम् संपदे प्राप्तः तत्रेति विशेषः तं लोके प्रसिद्धम् शुभमंगलकरम् साक्षिगोपालकं सा॰ ॥१५॥

क्षिगोपालाख्य विष्णुप्रतिमाम् ऐक्षत् ददर्श ततः किष्किंधा नगरीं भूतदाख्यं पुरविशेषम् संपेदे ततः किष्किंधा
पुरविशेषात् पावनं पवित्रकरम् पंपासरः तदाख्यं सरोवरम् संपेदे तत्र सवनं स्नानम् चकार ततः चंद्रभागा नदी॰
तीरे पुंडलीकं पुरं गत्वा प्राप्य मंजुलतरम् अतिरमणीयम् विठ्ठलनाथम् ऐक्षत सनुषंगः तं विठ्ठलेशं नत्वा प्रणम्य प
रिरभ्य आलिंग्य च ततो गोदावरीं तदाख्य नदीविशेषम् संगतः प्राप्तः सन् तत्र सवनम् आप्लवनम् चकार ॥ ५३ ॥ स
इति ततो गोदावरीतः तपस्विनश्चांद्रायणादिव्रतकर्तृ हतां गामुनयस्तेषां राजाते भोप्यधिकतपसा निहन्त्री

सदंडकं स प्रियदाववासः प्रदक्षिणीकृत्य तपस्विराजः ॥ ततो जनस्थानमगात्स तीक्ष्णः ससलो मुसिंधुं तपतीमुपेतः
५४ ॥ रेवामही साभ्रमतीः प्रयातः सभीमनाथं त्रिविमर्चनीयः ॥ ततश्चरन्नैक्षत गोपनाथं प्रभाससंज्ञं समीयाय ती
र्थम् ॥ ५५ ॥ हत्वा तां गत्वा कुत्स्वष्टतमतया नृगोभमानः सतरां प्रियः दाववनेवासो निवसनं यस्य स तथोक्तः प्रतीक्ष्णः
पूज्यः स वर्णिराजो नीलकंठः दंडकं तत्संज्ञमरण्यम् गाः स्वापत तद्विशेषः तद्दंडकारण्यम् प्रदक्षिणीकृत्य परि
क्रम्य ततः जनस्थानम् नासिकाख्यं पुरम् अगात् सनुषंगः ततः तपती सिंधुः तपतीसंज्ञां सरितम् उपेतः प्रा
प्तः सन् स स्नात्वा प्लवनं चकार ॥ ५४ ॥ रेवेति ततस्तपती नदीतः अर्चनीयो ब्रह्मभूतैर्मुमुक्षुभिः रुपासतया पूजनीयः

सवर्णिराजः रेवानर्मदाख्यानदीमहीतत्संज्ञानदीसाभ्रमतीतदाख्यापिनदीताः प्रयातः अनुक्रमेणप्राप्तः सन्
ततःभीमनाथंन्रिवंभीमनाथाख्यमहेश्वरम् ऐक्षतददर्शततः चरन्गच्छन्सन्गोपनाथंगोपनाथाख्यंत्रिवम्
ऐक्षतेसनुपंगः ततःपंचतीर्थीकुर्वन्नितिनिर्दोषःप्रभाससंज्ञंतीर्थम्समीयायसंप्राप्तः संपूर्वोदिक्षिणगताविसस्मा
द्विट्॥५५॥एवमसंख्यजनश्रेयस्त्रिकीर्षयातीर्थयात्रांसंचरतस्तस्यप्रतापादिसंक्षेपतोवर्णयति अनीनन्नादिति
नीर्थेषुपुलहाश्रमादिस्थानेषुचरतिजनश्रेयोर्थंगच्छतीतितथोक्तः सवर्णिराजः तत्रतेषुपूर्वोक्तेषुतीर्थेषुविवादैः

अनीनन्नाप्सर्वमधर्मसर्गंनृपंचनीहारमिवोष्णरश्मिः॥सतत्रपाखंडिगुरून्विवादैर्म्मतिष्टिपत्तीर्थचरोविजित्वा॥५६
तेभ्योमुमुक्षून्निवघातुकेभ्योविमोचयित्वाजिनयोनिसंघान्॥मद्यः प्रचिच्छेदमहानुकंपस्तदीयसंसारदुरंतपाशम्॥५७

सच्छास्त्रसंमतसंवादैः पाखंडिनः बाह्यतः नैवविवेधप्रवज्याक्तलिंगानिविभ्रतः अतएवत्रासाः मुसल्मपिगुरवोगुरूनांप्रा
मायेजनास्तांस्तथोक्तान्विजित्वाविनिर्बिवेणपराभूयसर्वमधर्मसर्गम् अपेयपानाभक्ष्यभक्षणागम्यस्त्रीगमनादित्ति
दानलोभकामसमास्वादस्नेहमानादिरूपंसमस्तधर्मपरिवारम् उष्णरश्मिसूर्यः नीहारंहिममिवअनीनन्नाप्सविक्षप
तृणिजंतान्नृपतेर्लङ् नृपंजनश्रेयोनिदानज्ञानविरक्त्यादिपरिवारसहितंधर्मंचययातिष्ठिपत्स्थापयामास॥५६॥तेभ्यः ॥१६॥

तिमहतीअनुकंपादयायस्यसतथोक्तः सवर्णिराजः तेभ्यः पाखंडिगुरुभ्यः मुमुक्षून्संसृतेर्मोक्तुमिच्छन्जनान्घातु
केभ्योहिंस्रेभ्यः अजिनयोनयोमृगास्तेषांसंघाः समूहास्तांस्तथोक्तानिवसद्यः शीघ्रम्मोचयित्वा तेषांमुमुक्षूणां
संबंधीयः संसारोनीचोच्चयोनिषुसंचरणंसएवदुरंतयात्रोबलिष्ठनिगडस्तम् चिच्छेदबिभेदम्॥५७॥जनानिति
सवर्णिराजः नविद्युतेसंख्यागणनायेषांतांस्तथोक्तान् अपरिमितान्जनान्नृपेणधर्मेणउपपन्नायुक्ताम्भवःसंसा
रचक्रभ्रमणंतस्माभीतिर्भयंतस्याः भेदेविदारणेपटीयसीप्रतिसमर्थाम्भक्तिवचनेसादिनापदुत्रादादीयस्मन् उगितः

जनानसंख्यानुपदिश्यभक्तिंनिरस्तसंसारभयान्सचक्रे॥वृषोपपन्नांभवभीतिभेदेपटीयसींकल्पलतोपमानाम्॥
५८॥स्थितिंविरक्त्यस्वविरक्तिभाजःप्रदर्श्यंस्तैर्थजनांश्चसेहे॥सदायुतापाद्युत्रामससहोविमुक्तिदाताप्युपदेष्टुकामः
५९॥ श्रेतिद्वीपकल्पलतायाः कल्पवृक्षलतनुत्रागवायानउपमानंसाहश्यंयस्यास्तांतथोक्ताम् कल्पलतावत्स्वाश्रितज
नमनोरथसंपादयित्रीमिसर्थः भक्तिमुडपदिश्यउपदिश्यानुशिष्येतियावत्जनानितिछित्तीयात्वकथितंचेतिक
र्मसंज्ञायाअर्थनिबंधनत्वाद्धतिनद्यानिरस्तंविनष्टंसंसारस्यसंसृतिभ्रमणस्यभयंयेषांतांस्तथोक्तान्चक्रेविदधे
५८॥स्थितिमिति विरक्तिंवैराग्यंभजंतसुपादत्तेइतितांस्तथोक्तान्भगवद्धितरवस्कपुतीत्रतरुचित्राजिनोम

हाप्यु। नीन् तीर्थेषु भवा निवासिनो ये जनास्तांस्तयोक्तांश्च तत्र भवद् सएव विरक्तस्य वैराग्यवतः पुंसः स्थितिं दत्त्वा
म्यदर्श्यन् सवर्णिराजः विमुक्तिदाता स्वयं मोक्षप्रदोपि तदुपदेष्टुकामः जनहितबोधनेच्छुः सन् तुं काममनसोरपि
पीतिमकारलोपः असमस्तं असंतं सोमन्त्रा कथम् पायुश्च तापो निदाघ। अर्कांशु संतापश्च तावादी येषांक्षुधापिपासा
दीनां तेषां पदत्राम् इत्यः खम् सेहे मम्रषे ॥५९॥ चराचर इति वने कानने चराचरे गच्छन् चरतेः पचाद्यचि चरितिलिप
नीसादिनाद्वित्वमभ्यासस्यागागमश्च चमूरोर्मृगस्य चर्मकृत्तिम् दधानो बिभ्राणः अंभोरुह इति नृष्यः किंजल्का:

चराचरश्चर्म वने चमूरोर्जटां स किंजल्करुचं दधानः। अपेतचेला वरणप्रतीको वार्क्षे बहिर्ग्राममुवास मूले॥६०॥
क्वापि चिद्वृत्तमयाचितवृत्तिः क्वापि रुरूम चरद्धरत्रीव। गंधमात्रमपि योरमणीनां निर्विसृष्ट विषयो सहमानः॥
६१॥ केसरास्तेषां रुक्द्युतिर्यस्यास्तां तथोक्ताम् पिंगलवर्णामिसर्थः जटां दधानः अपेतं गतं चेलस्य वस्त्रस्याव
रणं परिधानं येषां तथाभूताः प्रतीकाः अवयवा यस्य सतथोक्तः कौपीनमात्रपरिग्रहवानिसर्थः सवर्णिराजः ब
हिर्ग्रामं ग्रामाद्बहिर्भागे अपपरिबहिरंचवः पंचम्येसव्ययीभावः वार्क्षे वृक्षसंबंधिनी मूले उवास वसतिस्म॥६०॥
क्वापि चिदिति वरं श्रेष्ठं रत्रीलं स्वभावोयस्य सतथोक्तः निःश्रेषतया विसृष्टास्यक्ता विषयाः शब्दादयो येन सतथो 

क्तः रमणीनां स्त्रीणाम् गंधमात्रं तदंगस्पृष्टया वाय्वा घ्राणमात्रमपि असहमानः सोढुमसमर्थः यो वर्णिराजः क्व
पि चित्कस्मिंश्चित्समये अयाचितवृत्तिः अयाचिता याचनमृते दैवेच्छालब्धान्ना दिना वृत्तिराहारो यस्य सतथो
क्तः अमयोपवसन्निसर्थः आसीदिति शेषः क्वापि कस्मिंश्चित्काले रुरूम् जलरुह पर्णाद्रूम् इत्रतमप्रचर
दकरोदिसर्थः चरतेर्गतिभक्षणार्थत्वेपि धातूनामनेकार्थत्वात् ॥६१॥ पूर्वमिति अत्रास्मिन्भूतले यथायेन प्र
कारेण पूर्वं प्राक् आर्षभः ऋषभस्य नाभिसूनोरपत्यं पुमान् भरतः मृगत्वावस्तेहान्मृगत्वं प्राप्य आंगीरसगोत्रो

पूर्वमत्र भरतो यथार्षभो वर्त्तते स्म जडविप्रतां गतः। आश्रयः सजगतां तथा निवर्णिद्वियसकृगुणनिधिस्तपोधनः॥
६२॥ सिद्धतापसगणा बलिनो ये वीक्ष्य तस्य सुतपः शुभमूर्त्तेः। तद्विधं तदपि कर्तुमुदारं प्रापुरेव सहतेन निवासम्॥
६३॥ सन्नोथः कश्चिद्द्विजस्तस्यापसत्वेनाविर्भूतः जडविप्रतां गतः प्राप्तः सन् वर्त्तते स्म तथा तेन प्रकारेण जगतां
ब्रह्मांडानाम् आश्रयः आधारभूतः दिव्या अलौकिका ये संतः शोभमाना गुणाः सत्स्नोषांवादयस्तेषां निधिः स्थद
भूतः तपएव धनं द्रव्यं यस्य सतथोक्तः सवर्णिराजः अनिशमसत्त्वम् वर्त्तते स्म ॥६२॥ सिद्धेति बलिनो बलिष्ठाः ये
सिद्धाः अणिमादिसिद्धिं गताये तापसास्तपस्विनो मुनयस्तेषां गणाः समूहाः ते विश्रुभामंगलकरमूर्त्तिः स्वरू

पंचयस्सतस्सतथोक्तस्स तस्य वर्णिराजस्य स्कृतपः स्कृतं तपः तीक्ष्णं दुस्तप्तं तस्य वर्णिराजतपसो विधाप्रकारः तं वि 
धाय स्सतन्नथोक्तम् उदारं महत् ततपः कर्तुं विधातुम् तेन वर्णिराजेन सहसाकम् निवासम् प्रापुरेव ॥ ६४ ॥ ष्ट
द्वेति ते सिद्धतापसगणाः वपूंषि वर्ष्माणि तेषु सक्तिः प्रीतिर्येषां तेषां भावस्तत्ता तत्तया हेतुभूतया उग्रं तीव्रम्
अत्र तं तपः करणक्लेशम् सोढुम् अनाक्रुवंतो असमर्थाः संतः त्रिंशसकलजनमंगलकरं कीर्तनं नामोच्चारणं यु
स्सतस्सतथोक्तस्स तस्य वर्णिराजस्य समागमं सहवासम् त्रीणि वा पंच वेति त्रिपंचानि संख्यया अख्यया द्वासधिकस्स
कृत्वा त्रिपंचानि दिनानि तस्य समागमं ते त्रिः नक्तीर्त्तनस्य ॥ चक्रुर्वपुः सक्तितयान्यासु प्रपलायनं सोढुमनाकुर्वं
तः ॥ ६४ ॥ स्कंदबाणवसुभूमितवर्षे पुण्यजः सनभसोऽसितषष्ठ्याम् ॥ चारुलोजनगरं प्रतिपेदे दर्शनो चिततपो
मयरोचिः ॥ ६५ ॥ द्वाः संख्येये इति संख्येयार्थसंख्यायाम् बहुव्रीहिः बहुव्रीहौ संख्येये इति डच् दिनानि त्रिदि
वसपर्यंतं वा पंचदिवसपर्यंतम् कृत्वा विधाय पलायनं पलायनं प्रच्छन्नं शीघ्रगमनम् चक्रुः ॥ ६४ ॥ स्कंदेति द
र्शनेप्रेक्षणे उचितं मर्दतपसश्शौचं प्रायणादिव्रताद्यागतं प्रादुर्भूतं रोचिः कांतिर्यस्य स तथोक्तः ततः आगत इति म
यप्रत्ययः पुण्यात्कर्मदेवाज्जायते प्रादुर्भवतीति तथोक्तः सवर्णिराजः स्कंदः षड् षट् बाणाः पंच वसवः अष्टौ ना ॥१८॥

शोभूः एकनैकस्तैर्मितं तं यः वर्षे तस्मिन् नभसः श्रावणस्य असितः कृष्णपक्षः तस्य षष्ठी तिथी तस्याम् चारुरम
णीयम् लोजनगरं लोजाख्यं पुरम् प्रतिपदे प्राप ॥ ६५ ॥ संविस्तारयत इति व्रतिवराः नैष्ठिके ज्ञास्तेषाम् यत्राताः स
मूहास्तेषां एकचूडामणिर्मुख्यमुकुटमणिभूतः वंद्यः स्तुत्यः सवर्णिराजः तत्र तस्मिन् लोजनगरे वसतः स्थिता
न् क्षितौ भूमौ भवहरां स्वाश्रितजनसंसृतिमोचनीम् श्रीकृष्णस्य भगवतो भक्तिम् संविस्तारयतः सम्यक् प्रथयतः
रामानंद इति समाह्वयो नाम यस्य स तस्य स तथोक्तस्य सद्गुरोः जनश्रेयो निदानत्वादुत्तमदेशिकस्य त्रिष्य व्रतान्

संविस्तारयतो नमज्जवहरां श्रीकृष्णभक्तिं क्षितौ रामानंदसमाह्वयस्य वसतः शिष्यव्रजान् सद्गुरोः ॥ वंद्यस्तत्र सवं
द्वितोव्रतिवरव्रातैकचूडामणिस्तैरागमेरुदये विधोरिव मुदं पाथोधिभिर्मूर्च्छितैः ॥ ६६ ॥ प्रश्नांस्तमाप्छ्य समनोहरन्
जं तद्गुत्तरसुसमितात्तहर्षाः ॥ आवासयन् स्वालयमर्चनीयं चिंतामणिं रम्यमिवादृतास्ते ॥ ६७ ॥ शिष्यसमूहान्
विधोश्चंद्रस्य उदये प्रादुर्भावे मूर्च्छितैर्वृद्धंगतैः पाथोधिभिः समुद्रैरिव मुदं परमहर्षम् आप्तैः तैः स्तच्छिष्यवर्गैः
वंदितः अभिवादितः सन् अनमत् प्रणामं विदधे जनश्रेयसे नैष्ठिकवेषेण विचरतः पुरुषोत्तमस्य तस्योपलब्धा
तेषां चित्ते तिरामाह्लादो भूदिति भावः ॥ ६६ ॥ प्रश्नानिति ते रामानंदमुनिशिष्यवर्गाः मनोज्ञं स्कंदरं नीलं स्वभावो

हरिसं॰ ॥१९॥ यस्तं तथोक्तम् अर्चनीयं पूज्यम् तं वर्णिराजम् प्रश्नानुकथककथिकताः आप्टच्छपसम्यक् पृष्ट्वा अकथितं ॥ सर्ग॰१०
चेतिपृच्छतेर्द्विकर्मकत्वम् तेषां प्रश्नानामुत्तराणि तेषां श्रुतिः श्रवणं तया अतिजातउत्सन्तोहर्षो महाह्लादो येषां
षां ते तथोक्ताः एवंविधा मुत्तराणितु केनापि कर्तुं न नुक्यं तेइति साश्चर्यं सन्निमेषधूननं प्रसन्नचिता बभूवुरिति
भावः अतएव आहताः वर्णिराजस्य पूजनादि विधावादरयुक्ताः संतः रम्यमति रमणीयम् अचिंतामणिमिव स्वा
जयं नित्ताश्रमम् आवासयन् उपान्वध्याङ् वसइतिकर्मत्वम् नित्ताश्रमे निवासयामासुरित्यर्थः ॥६७॥ तपइति ॥

तपो वृषज्ञानविरक्तियोगक्षमाद्यसंख्येयगुणांबुराशिम् ॥ महाप्रतापं तमवेक्ष्यमाणास्ते विस्मयं ते स्म विरक्ति
मंतः ॥६८॥ तपश्चांद्रायणादिव्रतवत् वृषो धर्मश्च ज्ञानं वेदनं च विरक्तिर्वैराग्यं च योगो ऽष्टांगश्च क्षमापराधस
हनं च तान्यादयो येषां ते तथा भूताये असंख्येयाः संख्यातुगणयितुमनर्हा गुणा अपहतपाप्मत्वादयस्तेषां
मंबुराशिः समुद्रस्तम् महान् दिगंतव्यापी प्रतापः प्रभावो यस्य तं तथोक्तम् तं वर्णिराजम् अवेक्षमाणाः पश्यं
तः विरक्तिर्वैराग्यं प्रकृष्टं विद्यते येषां मितितथोक्ताः अतितुरायणे प्रमतुम् ते रामानंदमुनिशिष्याः विस्मयं ते स्म अ
साश्चर्यं प्रापुः लोके ऽस्माभिर्बहवो निर्वेदवंतो वलोकिता स्तथापितपः प्रभृत्य समसाधारण सद्गुणगणो ऽस्य तु ॥१९॥

दृष्टस्तेतादृगस्मच्चक्षुर्विषयो न कर्हिचिज्जात इति साश्चर्या बभूवुरिति भावः ॥६८॥ तं वित्र्यधावितर्कयं तप्रोचुः
किमिति वर्णिरूपेण नैष्ठिकब्रह्मचारिवेषेण परमासुत्कृष्टो देवो नु वस्मादिदेवता विशेषः किं वर्णाश्रमधर्म
प्रवर्तकः स्वैप्रज्ञातः प्रादुर्भूतः अथवायोगिनः सनकादयः वदरिकाश्रमनिवासिनो वा श्वेतद्वीपनिवासिनो निरन्न
मुक्ता वा तेषां मध्ये कश्चिदीश्वरो ऽग्रणीः अष्टांगयोगादिप्रवर्तकः स्वैप्रज्ञातः किम् अथवा हरिः स्वाश्रितजनसंक
टायन्निवारकः साक्षात्पुरुषोत्तमः एकांतधर्मादिप्रवर्तकः स्वैप्रज्ञातः किम् इस्य समुनाप्रकारेण ते रामानंदमुनि

किं वर्णिरूपेण हरिः प्रजातो योगीश्वरः किं परमो नु देवः ॥ संप्रापुरित्थं पुरुसंशयं ते तत्रानवद्योपपत्याम प्रधाने ॥६९
[illegible] ॥ आवासयन्नु [illegible] पर्णकुटीयं चिंतामणिं [illegible]
[illegible] कतितत्र मासः स्वसद्गुणाद्वीक्षणसक्त चित्तैः ॥ स पिप्पलग्राममुपेत्य तैस्तं तद्दर्शनोत्कंठमनाः प्रपेदे
पु॰ त्रिप्याः न विद्यते ऽवद्यं दोषो यस्य स तथोक्तः अस्मदृष्ट्यनोपपद्यस इत्यर्थः उपग्रामः स्वस्व विषयेभ्यः इंद्रियांतःकरण
वृत्तिप्रसाहरणरूपः पारमहंस्यधर्मः प्रधानं मुख्यो यस्य स तथोक्तः स्वधासो ऽभवत् तस्मिंस्तथोक्ते तत्र तस्मिन्व
र्णिराजे पुरुसंशयं बहुसंदेहम् संप्रापुः समुपलेभिरे ॥६९॥ स्थित्वेति तन्नतामहती इच्छा अपरिमिता जनो ऽ

हरिसं॰ रणरूपः अनुरागो यस्य स तथोक्तः महेच्छस्तु महाशय इति सर्वर्लिराजः तत्र तस्मिन्नलीनगरे स्वसात्मनो सर्ग॰ १०
॥ २० ॥ येसं तत्र तत्कृष्टतमा गुणाः स स नो चादयस्तेषां प्रेक्षणं दर्शनं तेन सन्तानिविच्छिन्ना मंतः करणानि येषां ते स्तथो
क्तैः तै रामानंदमुनि शिष्यैः सह कतिमासः कतिपयान् मासान् कियेन्मासपर्येषं तमिसर्थः स्थित्वा उषित्वा तस्य
रामानंदमुनेर्दर्शनेन प्रेक्षणेन उत्कं उत्सुकं त्वरायुतं मनो यस्य स तथोक्तः अत एव तच्छिष्यैः साकमु पिप्पलग्राममनुपेस
प्राप्य तं रामानंदस्वामिनम् प्रपेदे प्रापत्तः ॥ १० ॥ नुद्रवेति वर्लिनो नैष्ठिकव्रतवंतस्तेषां राजानो ग्रेसरास्तेषां लिपिः

उद्धवावतरमुत्तमौजसं तं विलोक्य करुणापयोनिधिः ॥ वर्लिराजलिपिमौलिमंडनस्वाश्रितैः परिहितं तन्नाम सः
११ ॥ बिभ्रदंबुरुहकेसरद्युतिरम्यमूर्द्धनि लसत्जटाच्छटाः ॥ इंद्रनीलमणिभास्करच्छविसत्तर्जयन्नतडिदंबुदश्रिय
म् ॥ १२ ॥ पंक्तिस्तस्या मौलिर्मुकुटस्तत्र तत्सर्ववरीयस्तेन वर्त्तमानस्तस्यापि मंडनं भूषणभूतः करुणाया घृणाया
पयोनिधिः पारावारः सवर्लिराजराजः तुत्तममतिश्रेष्ठमोजः प्रतापो यस्य तं तथोक्तम् स्वमात्मानमाश्रिता अ
नन्यतया भजमानास्तनास्तैस्तथोक्तैः परिहितं वेष्टितम् उद्धवस्य श्रीकृष्णैकांतिकभक्तस्य अवतरमवतारस्तेना
विर्भूतम् तं रामानंदस्वामिनम् विलोक्य दृष्ट्वा नमस्कार अभिवादयांचक्रे ॥ ११ ॥ बिभ्रदिति अंबुरुहं पद्मं तस्य ॥ २० ॥

केसराः किंजल्कास्तद्वत् द्युतिः कांतिर्यासां तास्तथोक्ताः लसंती शोभमाना याच्छटा जटा तस्याः छटाः समूहा
न् रम्ये रमणीयो यो मूर्द्धा मस्तकं तस्मिंस्तथोक्ते बिभ्रत् दधत् इंद्रनीलमणिः नृपाश्मोपलस्तद्वद्भास्करा देदीप्य
मानाच्छविः प्रभा यस्य स तथोक्तः अत एव तडिति विद्युल्लताभिः महितो योंबुदो मेघस्तस्य श्रीः शोभा ताम्
तर्ज्जयंस्तिरस्कुर्वन्न सतं नमेति पूर्वेणानुषंगः ॥ १३ ॥ अंजनेति तनौ देहे अंजनं कज्जलं तद्वत् द्युतिः कांतिर्यस्य त
त्तथोक्तम् मृगाजिनं कृष्णमृगचर्म पिंगा पिंगलवर्णा मुंजतृणविनिर्मितास्तन्मयी या मेखला कांची तां तथोक्तां

अंजनद्युति मृगाजिनं तनौ पिंगमुंजमयमेखलां दधत् ॥ स्वर्णमेखलकृपिंजरांबरं देवकीसुततनुं विडंबयन् ॥
१३ ॥ द्विजकांतिविलसत्कृशाकृतिर्ब्रह्मसूत्रमतिमंजुलं दधत् ॥ सादरं मुनिगणैर्निरीक्षितो मूर्त्तिमानिव तप
श्रियामुदा ॥ १४ ॥
दधत् अत एव स्वर्णकनकं तन्मयमेखला यस्मिन् तत् दस्कृष्टुललितं पिंजरं कपिशं चांबरं व
स्त्रं यस्यास्तां तथोक्ताम् देवकीसुतः श्रीकृष्णस्तस्य तनुर्मूर्त्तिस्तां विडंबयन् अनुकुर्वन्नसतं नमामेति आर्थीयमु
पमा ॥ १३ ॥ द्विजेति द्विजातिरमणीया कांतिस्तेजस्तया विलसंती शोभमाना कृशा दुर्बला आकृतिस्तनुर्यस्य
स तथोक्तः अतिमंजुलमतिसुंदरम् ब्रह्मसूत्रं यज्ञोपवीतमद्धधत् वामांसे बिभ्रत् मूर्त्तिमान् धनतपशक्तिः

॥३१॥ तपश्चर्यस्तपःपुंजइवस्थितः मुनिगणैः रामानंदस्वामिशिष्यसाधुवर्गैः सादरं ससंभ्रमम् मुदा हर्षेण निरीक्षितो
ऽवलोकितः संतनना मेति ॥१४॥ धर्मेति धर्मश्च साधुजनाः सत्तनाश्च तेषां रक्षणं पालनं तस्मिन्नुद्यतौ तत्परौ मेच
कार्जुनमल्लाचकार्जुनाश्च श्याचनेनतथाभूते मनोहरे कमनीये आकृती विग्रहौ ययोस्तौ तथोक्तौ तौ वर्णो ऽजुनील
कंठरामानंदस्वामिनौ संगमं संयोगम् अवाप्य प्राप्य स्फटिकः शुभ्रमणिश्च नीलः इंद्रनीलवर्णोयः सन्नूनौ भमा
नौ मणिश्च ताविव भृशम् समंतम् रेजतुः शुशुभाते ॥१५॥ अंशुभिरिति तमालस्य तापिच्छस्य पुष्पं तमालम् पुष्प
धर्मसाधुत्तनरक्षणोद्यतौ मेचकार्जुनमनोहराकृती ॥ रेजतुर्भृशमवाप्य संगमं ताविव स्फटिकनीलसन्मणी ॥
१५ ॥ अंशुभिः स्फुरत्तमालसन्निभैर्मल्लिकाकुसुमकेसरार्जुनैः ॥ तावुभौ स्फुरितरोचिषौ मिथः संगताविव तदे
कवर्णताम् ॥१६॥ मूलेषु बकुलमिस्पणोलुकद्विहिनंधसमेसर्वेमितिलकीबलम् कालस्कंधस्तमालः स्यात्ता
पिच्छोपि समरः स्फुरं विकसितं तमालं तापिच्छपुष्पं तेन सदृशैः स्फुरत्तमालसन्निभैः निसमासत्वादस्वप
दविग्रहः मल्लिकाकुंदस्तस्याः कुसुमानि पुष्पाणि तेषां केसराः परागास्तद्वदर्जुनैः शुभ्रैः अंशुभिः किरणैः
मिथः परस्परम् स्फुरिते लिप्ते रोचिषी कांती ययोस्तौ तथोक्तौ एतेविशेषणं श्लूतांचावयवावयविभावाद्वेदनिर्देशः ॥३१॥

तावुभौ नीलकंठरामानंदस्वामिनौ तदामेलनसमये एकवर्णतां समानवर्णताम् संगतौ प्राप्ताविव रेजतुरिति
पूर्वेणानुषंगः उभयस्त्रविमिलनाद्वयोरपि मूर्त्तावृषवसंगतौ भागीरथी कालिंदी संगमइव स्फटिकेंद्रनीलम
णिप्रभासंयोगप्रायः कश्चित्समानोवर्णोजनितस्तिमितावेयमनयोः समानवर्णतोत्प्रेक्षा ॥१६॥ संचयेनेतिहरे
नीलकंठवर्णी रात्तस्य दिव्यानि रमणीयानि यानि रोचींषि तेजांसि तेषांतथोक्तानाम् संचयेन समूहेन सह स
मिलिताः संवलिताः तस्य रामानंदस्वामिनः त्विषः कांतयः रजमां रात्रावि सधिरत्तनिवि भक्त्यर्थे ऽव्ययीभावः
संचयेन हरिदिव्यरोचिषां तत्विषः समिलिता बभुर्यथा ॥ धर्मतात तनयांबुपातिनोरन्वयोधिरजनिक्षपेत्रितुः
१७ ॥ वीक्ष्य सूर्यमिव तं मुनिं मुदा लोचने दधदुरुश्रियौ प्रभुः ॥ इसमानुपगते विकासतां पुंडरीकनयनः स्फुटो
भवत् ॥१८॥ धर्मोऽपमरतास्तस्य तातः पिता सूर्यस्तस्य तनया पुत्री यमुना तस्याः अंबुजलं तस्मिन्नुपातिनः पतन
शीलाः क्षपाया रात्र्याः शितुश्चंद्रमसन्न्वयोगभस्तयो यथातथा बभूषुः प्रकाशिरे ॥१७॥ वीक्ष्येति सूर्यमिव तं मुनि
रामानंदस्वामिनम् वीक्ष्य निरीक्ष्य मुदा हर्षेण विकासम्प्रांतां प्रफुल्लतांम् उपगते प्राप्ते अतएव उर्वी महती श्रीः शोभा
ययोस्ते तयो लोचने चक्षुषी दधत् बिभ्रत् प्रभुर्धर्मरक्षणसमर्थः असौ वर्णिराजो हरिः पुंडरीकनयनइसे वं स्फुटो

भवत्सूर्यसन्निधौ श्रीविकासंभवपुंडरीकसाधर्म्यात्पुंडरीके कमले इव नयने नेत्रे यस्य स इत्यवयवार्थलाभे
न पुंडरीकनयन इति अस्य क्रमस्य अन्वर्थसंज्ञो अभूदित्यर्थः इयत्स्फुटो भवदिति पदार्थहेतुकस्य काव्यलिंगस्य सूर्यमि
वेत्युपमातापेक्षत्वादनयोरंगांगिभावेन संकरः॥१७॥ यत्रेति लये जगत्सलये सति जातिमंगलं मसंततगच्छ
यो निदानभूतरूपात्माविग्रहो यस्य लस्य तथोक्तस्य तस्य वर्णिराजस्य यत्र यस्मिन् वपुषि नारीरे सर्वभुवनानि
चतुर्दशलोकाः सावकाशं असंकोचं यथास्यात्तथा असमुर्भातिस्म भामानेइत्यस्माद्लङ् तत्र तस्मिन् वपुषि स

यत्र सर्वभुवनान्यमुर्लये सावकाशान्यप्रतिमंगलात्मनः॥ नोममुर्वपुषि तत्र संसुदस्तत्क्षणस्य जगत्त्रिलोकनोद्भवाः
१९॥ तस्य वक्षसि निरंतरस्थितिं नाभिनीरजमुदस्य यातया॥ ज्ञप्रधर्षणे हि वदनं स्मरहिम ईनमयाक्षि विश्रिया॥
८०॥ स्फुरेरामानंदमुनेर्यद्धि त्रिलोकनं प्रेक्षणं तस्मादुद्भवंतिप्रादुर्भावमाप्नुवंतीति तथोक्ताः संमुदो तिहर्षाः॥
नोममुः अतिरिच्य तेस्मेत्यर्थः चतुर्दशभुवनभरणपर्याप्ते वपुष्यंतर्नमांतीति कवित्रोदोक्तिसिद्धहर्षातिशये
नस्वतः सिद्धस्याभेदेनाध्यवसितत्वादतिशयोक्तिः सा च मुदामतः संबंधे असंबंधोक्त्या असंबंधे संबंधरूपा
तिशयोक्त्यपेक्षा॥१९॥ तस्येति नाभिः नीरजं पद्ममिवेत्युपमितसमासः नाभिकमलम् उदस्य विहाय ॥३३॥

जनानामिति त्रिदोषः स्मरः कामस्तं द्वेष्टिरूपामूलतत्वसाटयतीति तास्य तथोक्तस्य तस्य वर्णिराजस्य हरेः वक्ष
सि निरंतरस्थितिं सततावस्थानं यातया प्राप्तया श्रिया तस्य रामानंदमुनेर्विमर्दनं गाढपरिरंभणरूपेतस्मा
दुद्भयं तस्मादिव वदनं मुखम् अध्यधर्षणे हि अधिरूढम् भयाकुला द्युतुंग प्रदेशमारोहंतीति लोकवेदयोः
प्रसिद्धमिति भावः इवेत्युत्प्रेक्षायां अत्र वाच्यायाः मुनिपरिरंभणोद्भवायाः शोभायाः श्रियेतिश्लेषमहिम्ना
प्रतीयमानया रमया सहाभेदाध्यवसायात् क्रमेण नाभिपद्मादनेकाधारसंपर्काभिधानात् श्लेषमूलातिश

योर्मजातपुलकाचितांचिताधर्मजन्मनि पृथक्स्थितेहरौ॥ नातहादपितदंगवल्लिकाकुड्मलीपकुसुमाकर
श्रियम्॥८१॥ योक्त्युत्थापितस्तावद्द्वाद्यः पर्यायभेदः क्रमेणैकमनेकस्मिन्नाधारे वर्ततेयदि एकस्मिन्नथ
वानेकं पर्यायालंकृतिर्मतेतिलक्षणात् तदुपजीविता श्रीमुखारोहणस्य भयहेतुकत्वकथनादुत्प्रेक्षेति त्र
योरंगांगिभावेन संकरः॥८०॥ नर्मेति धर्मोत्तजन्मज निर्यस्य तस्मिंस्तथोक्ते हरौ नीलकंगरब्यवर्णिराजे पृथक्
स्थिते तस्मात् श्लिष्य विश्लिष्ट पिवार्मतदंगात् लिंगनस्करत्वं तस्माज्जातानि प्रादुर्भूतानि यानि पुलकानि रोमोद्गमास्तै
रचिताच्याप्ताप्यचिंतास्कंदगतस्य रामानंदमुनेः अंगानिकराद्यवयवा एव वल्लिका लतेवेत्युपमितसमासः कुड्म

निर्विकसितानि यामिनीपकुड्मानि कदंबपुष्पाणि येषामाकरः समूहस्तस्य श्रियं नुनोभासनाज्जहाल न सा
न्नः किं तु स्वीचकारेत्यर्थः परिरंभापगमेपि तत्क्षणमेव रवानपगमात्तत्कार्यस्य पुलकोद्गमस्यानुवृत्तिरिति तात्प
र्यार्थः अत एव पृथक् स्थिते पुलकावृत्तेः कारणं कार्ये कथनाद्विभावना ॥ ८१ ॥ स इति कुशो दर्भस्तस्य पदं अग्र
प्रांतभागस्तद्वत् धीर्बुद्धिर्यस्य स तथोक्तः स रामानंदमुनिः तं वर्णिराजम् ससंभ्रमं सादरम् विधिवद्यथाशा
स्त्रम् अभिपूज्य समर्च्य कुशलं पप्रच्छ एष त्वान् सकलाः समस्ता ये सज्जनाः साधुपुरुषास्तेषां प्रियं प्रेमास्पदम्

सोभिपूज्य विधिवत्ससंभ्रमं तं पप्रच्छ कुशलं कुशाग्रधीः ॥ स्वांतिके सकलसज्जनप्रियं तमवासयदमेयविक्रमम्
८२ ॥ तं ग्राहदीक्षामथ देवदेवो हरिर्गरीयान्गुणधामधीरः ॥ प्रवर्तयिष्यन् जनतां स तस्मान्निरीक्ष्य तं स्फुटमदं
प्रपेदे ॥ ८३ ॥ अमेयं परिमातुमनर्हं पराक्रमं स्फुरत्त्वं तद्ददातीति यच्छतीति तं तथोक्तम् तं वर्णिराजम् स्वांतिके स्व
सन्निधौ न्यवासयत् निवासयामास ॥ ८२ ॥ तं ग्राहेति अथ रामानंदमुनिनिकटस्थितेरनंतरम् देवा ब्रह्मादय
स्तेषामपि देवः पूज्यः धियं राति ददातीति जनेभ्य इति धीरः सदा लोके अस्मात्कि पुसकलजनज्ञानप्रद इत्यर्थः अ
त एव गरीयान् अतिशायेन गुरुः हितोपदेष्टा गुरूणामपि परमगुरुरित्यर्थः द्विवचने सादिना गुरुत्वात् दीय ॥३३॥

सून् प्रियस्थिरे सादिना गुरोर्गरादेशः हरिः साक्षात्पुरुषोत्तमः स्वयं हरिनाम्ना प्रादुर्भूतोपि नरनाट्यानुकरणा
च्छिष्टाचारस्वीकार्यत्वाज्जननतां जनसमूहम् मोक्षमार्गे इति शेषः प्रवर्तयिष्यन् सन् तस्माद्रामानंदमुनेः सका
शात् दीक्षां व्रतसंग्रहम् तं ग्राह उपादत्ते स रामानंदमुनिः गुणानां सत्त्वादीनां धामस्थानभूतम् तं वर्णिरा
जम् निरीक्ष्य दृष्ट्वा स्फुटम् मदं अतिहर्षम् प्रमदसंमदौ हर्षे इत्यमरः प्रसयांतो निपाताः प्रपेदे प्राप्तः ॥ ८३ ॥ विदध इति
अथानंतरम् विपश्चितां ज्ञानिनाम् अग्रणी मुख्यः स रामानंदमुनिः तपश्चांद्रायणादिव्रतं विद्यतेनिसमस्येति

विदधे स विपश्चिदग्रणीः स्थनारायणमाख्ययेन तम् ॥ मुनिब्रह्मवयुतं तपस्विनं सहजानंदमतिप्रभाविनम् ॥ ८४
परिदत्तधुरं तमुन्मनाः स्वपदे योग्यतमं व्यतिष्ठिपत् ॥ अथ तं समुदस्य विग्रहं मुनिस्तुष्टं बदरीवनं ययौ ॥ ८५ ॥

तं तथोक्तम् अस्मायामेधास्रजो विनिरिति मत्वर्थे विनिः भूमनिंदाप्रशंसासु नित्ययोगे इति श्लोकवार्तिकेन
नित्ययोगे विहितः अतिशायितः प्रभावः प्रतापो विद्यते ऽस्येति तं तथोक्तम् मत्वर्थे इति तं नीलकंठवर्णि
राजम् आख्ययेन नाम्ना मुनिब्रह्मणा युतसहितम् नारायणं विदधे नारायणमुनिरिति लोके प्रसिद्धं नाम चका
रेत्यर्थः किंच तं आख्ययेन सहजानंदं विदधे सहजानंद इति विख्यातं नाम चकारेत्यर्थः ॥ ८४ ॥ व्यतर इति उन्म

नात्र कृत्यमुक्तं मनोयस्य स तथोक्तः स रामानंदमुनिः परिदत्ता समर्पिता धूर्वर्णाश्रमिजनानां स्वधर्मरक्षण
भारो यस्मै तं तथोक्तम् योऽयं तं निजपदारोहणोचिततमम् तं नारायणमुनिम् स्वपदे स्वाधिकारस्थाने
व्यतिष्ठिपत् निवेशयामास अथ निजधुरो वितरणानंतरम् विग्रहं तनुजम् समुदस्य संस्मार मुनिभिर्ऋषिभि
र्जुष्टं सेवितम् बदरीवनं ययौ ऊर्ध्वासः त्राणमुक्तः सन् बदरीकाश्रमं प्राप्तः ॥ ८५ ॥ व्यदधादिति अथ स्वगुरुदे
हसागानंतरम् स हरिः सहजानंदः तस्य रामानंदाख्यगुरोः निखिलाः समग्राः पारलौकिकीः परलोके भवाः क्रि

व्यदधादस्य पारलौकिकीर्निखिलास्तस्य यथाविधि क्रियाः ॥ अथ तं महर्षिं तदाश्रिताः सततं भेजुरपेतसंत्र
याः ॥ ८६ ॥ इतिश्रीहरिसंभवे महाकाव्ये हर्यैकैककविश्रीमदचिंसानंदवर्णिकृते नोलप्रभृतिवर्णनं नामा दश
मः सर्गः ॥ १० ॥
याः और्ध्वदैहिककर्माणि अथात्मादेशाज्जिष्पते इति परलोकत्राह्यामुत्रगम्यं कर्म निवसं
कादेन्नाः अनुगनिकादीनां चेसु भयपदन्तुद्धिः टिकृणजिसादिनाडीपृथाविधि यथान्यास्तम् व्यदधात् क
रोत् अथ रामानंदस्वामिवियोगानंतरम् तं रामानंदमुनिमाश्रिता भजमानाः जनाः अपेतसंत्रयागतसंदेहाः
संतः तं सहजानंदम् सततमजस्रम् भेजुः सिषेविरे ॥ ८६ ॥ इतिश्री पदवाक्यप्रमाणपारावारीणधुरीणविद्वन्‌ ॥ २४ ॥

यभट्टात्मजदीनानाथभट्टशिष्य श्रीप्रसक्षवाकदेवश्रीसहजानंदस्वामिचरणकमलोपासकगोपालानंदमु
नेः प्रेरितमतिआसावदकदयाश्रांकणतजश्रीहरिकृष्णैकभक्तभोलानाथभट्टकृतो श्रीहरिसंभवकाव्य
स्य विद्वज्जनाह्लादिन्याख्यव्याख्यायां दशमः सर्गः ॥ १० ॥ लिं० रावलजेरामोरारजी संवत् १९५६ नामहा
वदित्रयोदशी ने मंगलवासरे मेंथाणग्रामे समाप्ता ॥ ॥ श्रीभक्तिधर्मात्मजनायनीलकंठार्पणमस्तु ॥